# कालिकापुराणस्थाष्टाङ्गयोगप्रयोगानुशीलनम्

कालिकापुराणं शाक्तानां महत्त्वपूर्णः प्रतिनिधिग्रन्थो वर्तते । उपपुराणेऽस्मिन् विविधानि दार्शनिकतथ्यानि समाविष्टानि सन्ति। एतेषु दार्शनिकतथ्येषु योगदर्शनं मुख्यत्वेन प्रतिपादितमस्ति । पातञ्जलयोगस्य अष्टाङ्गानि वर्तन्ते । एतेषामष्टाङ्गानां विवरणं कालिकापुराणे सविस्तरमस्ति ।

कालिकापुराणस्य कवचवर्णनप्रसङ्गे 'अष्टाङ्गयोगः' इति शब्दस्य प्रयोगोऽस्ति[१] । अस्य शब्दस्य सम्बन्धः योगदर्शनस्य अष्टाङ्गयोगेनैवास्ति, यस्मिन् यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधीनां ग्रहणमस्ति[२] । खण्डेऽस्मिन् 'अष्टाङ्गन्यासः'इति शब्दस्य प्रयोगोऽपि विद्यते, यत्र क्षत्रियाय निर्देशोऽस्ति यत् युद्धे विजयार्थमष्टाङ्गन्यासपूर्वकं रणविधानं करणीयम्[३] ।कालिकापुराणे भगवती साङ्गयोगस्यावबोधिनीरूपेणोपस्थापिता[४] । अथ चोपपुराणेऽस्मिन् योगाङ्गानां सङ्ख्याऽष्टौ भवतीत्यपि स्पष्टतयोल्लिखितमस्ति[५] ।उपपुराणेऽस्मिनुद्घोषितं यत् यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधीत्याख्ये अष्टाङ्गयोगे कामोत्पादकगणैरपि विघ्नोत्पादनमसम्भवम्[६] । कालिकापुराणानुसारमष्टाङ्गयोगानुगामी योगी सदैव स्वयमेव शुद्धं भवति । अथ वर्णितञ्चाष्टाङ्गयोगानुगामी साधकः एव तं लोकं प्राप्नोति यतः पुनरागमनं न

---

[१] अष्टान्यष्टौ तथाष्टौ वसव इह तथैवाष्टमूर्तिर्दलानि।
प्रोक्तान्यष्टौ तथाष्टौ मधुमतिरचिताः सिद्धयोऽष्टौ तथैव ॥
अष्टावष्टाष्टसंङ्ख्या जगति रतिकलाः क्षिप्रकाष्टांगयोगा ।
मय्याष्टावक्षराणि क्षरतु न हि गणो यद्धृतोयस्त्वभूषाम्॥कालिकापुराणम्,५६/५१

[२]यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि॥ योगदर्शनम्, साधनपादः २९

[३]सदालिखेत् क्षत्रियस्तु विजयाय रणेषु च ।
अपरं तु रणाष्टाङ्गं गृह्यमेतत् प्रकीर्तितम् ॥ कालिकापुराणम्, ७६/ ६६ - ६७

[४]त्वं सन्धिनी सर्वयोगसाङ्गोपाङ्गविभाविनी । कालिकापुराणम्, ५ / ३२

[५]चिन्ता कीर्तिर्यतीनां त्वं त्वं तदष्टाङ्गसंयुता । कालिकापुराणम्, ५ / ३३

[६]यमानां नियमानाञ्च प्राणायामस्य नित्यशः ।
आसनस्य महेशस्य प्रत्याहारस्य गोचरे ॥
ध्यानस्य धारणायाश्च समाधेर्विघ्नसम्भवम् ।
मन्ये कर्तुं न शक्यं स्यादपि मारशतैरपि ॥ कालिकापुराणम्, ७ / ३३ - ३४

भवति[७] । अत एव कालिकापुराणस्यान्यस्मिन् स्थलेऽपि स्पष्टतया निर्दिष्टं यद्योगिनः अष्टाङ्गैः चिन्तनं कृत्वा परं-तत्त्वमाप्नुवन्ति[८] । योगस्य अष्टाङ्गेषु येषां वर्णनं कालिकापुराणे वर्तते, तेषां विवेचनमिदमस्ति -

**यमः** - अष्टाङ्गेषु प्रथमाङ्गं भवति यमः, यस्योपाङ्गानि भवन्ति अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः[९] ।

**अहिंसा -** यमस्योपाङ्गेष्वहिंसा इति प्रथमा[१०] । कालिकापुराणे अस्याः अहिंसायाः उपस्थापनं शान्तिज्ञानयोः साधनत्वेन कृतमस्ति[११] ।

**सत्यम् -** अहिंसायाः परं "सत्यं" भवति[१२], यस्योल्लेखः राजधर्मकथनमित्यस्मिन्नध्याये वर्तते[१३] । कालिकापुराणानुसारं सत्यस्य प्राप्तिः देव्याः अर्चनया जायतेति[१४] ।

**ब्रह्मचर्यः –**पञ्चसु यमेषु ब्रह्मचर्यमप्येकमस्ति । मनसा वाचा कर्मणा मैथुनत्यागमेव ब्रह्मचर्यमस्ति[१५] । कालिकापुराणे ब्रह्मचर्यस्य पर्याप्तोल्लेखरुपलभ्यते, यथा द्वाविंशेऽध्याये वर्णितं यत् महर्षि-वशिष्ठः ब्रह्मचर्ययुक्त आसीत्[१६] । वर्णितश्चोपपुराणेस्मिन् यत् ब्रह्मचर्यमनुसृत्य

---

[७]अष्टाङ्गयोगैर्यदवाप्तुमिच्छन् योगी पुनात्यात्मरूपं सदैव ।
निवर्तते प्राप्य यं नेह लोके तद्वै सारं सारमन्यन्न चास्ति ॥ कालिकापुराणम्, २८ /६

[८]रष्टाङ्गैर्यश्चिन्त्यये योगयुक्तैः तत्त्वं व्यापि प्राप्य यज्ज्ञानयोगे ।
परं यातायोगिनस्तं नमस्ते ॥ तत्रैव, २२ / ५५

[९]अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः । योगदर्शनम्, साधनपादः ३०

[१०]अहिंसाप्रतिष्ठायां तत्संनिधौ वैरत्यागः । योगदर्शनम्, साधनपादः ३५

[११]अहिंसा च तथा शान्तिः सदा तव भविष्यति । कालिकापुराणम्, ९ / ४०

[१२]सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम् । योगदर्शनम्, साधनपादः ३६

[१३]दृढशासनतासत्यशौचं मतिविनिश्यचयम् । कालिकापुराणम्, ८४ / ३१

[१४]कवित्वं सत्यवादित्वं सततं तस्य जायते । कालिकापुराणम्, ५६ / ६६

[१५]कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा ।
सर्वत्र मैथुनत्यागं ब्रह्मचर्य्यं प्रचक्षते ॥ गरूडपुराणम्, आचारकाण्डः, २३८ /६

[१६]शरीरधृग्ब्रह्मचर्यसदृशं तं जटाधरम् । कालिकापुराणम्, २२ / २२

सम्भोगरहितः शम्भुः तपश्चर्यामाचरत्[१७] । कालिकापुराणानुसारं ब्रह्मचर्येण वीर्यलाभो भवति[१८] ।ब्रह्मचर्ये वीर्यरक्षणं मुख्यं भवति अतः वीर्यशब्दस्योपलब्धिः कालिकापुराणेऽपि भवति[१९] ।

**नियमः** -यस्योपाङ्गानि शौचसंतोषतपः स्वाध्यायेश्वरप्रणिधानानि भवन्ति[२०] ।

**शौचम्** - नियमाङ्गेषु शौचं महत्त्वपूर्णाङ्गमस्ति[२१] । शौचस्योल्लेखः कालिकापुराणस्य विभिन्नेष्वध्यायेषूपलभ्यते[२२] । वस्तुतः शौचं (शुद्धता वा) मुख्यत्वेन प्रतिपादितमस्त्युपपुराणेऽस्मिन्[२३] । अत एव कालिकापुराणस्य स्पष्टनिर्देशोऽस्ति यत् अशुचिः महामायां कदापि न पूजयेत्[२४] । निर्दिष्टञ्चोपपुराणेऽस्मिन् यत् शुद्धदेहेन कृता अर्चना एव सार्थिकी भवति यतो हि शारीरिकशुद्धिः मनसो निवेशाय सहायिका भवति[२५] ।

**सन्तोषः** - नियमाङ्गे शौचात् परं सन्तोषः भवति[२६] । सन्तोषभावस्योपलब्धिः उपपुराणेऽस्मिन् पर्याप्तमात्रायां भवति । यथा वेतालभैरवावदताम्, हे महादेव ! आवां न राज्यम्, न च धनमिच्छावः । केवलं भवतामुपासनामिच्छावः[२७] ।

**तपः** - नियमाङ्गेषु तपोऽप्यन्यतमो वर्तते[२८] । उपपुराणेऽस्मिन् महायोगिनः मनोः तपसः चर्चा कृताऽस्ति[२९] । वर्णितञ्चोपपुराणेऽस्मिन् यत् तपसैवारुन्धती वशिष्ठं पतिरूपेण लब्धवती[३०] ।

---

[१७]शम्भुः सम्भोगरहितो देवमानेन वत्सरान् ।
अयुतानि तपस्तेपे सोऽपि स्थानं न चैक्षत ॥ कालिकापुराणम्, ३२ / १८

[१८]ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः । योगदर्शनम्, साधनपादः ३८

[१९]केचित्तद्वीर्यजातस्य केचिन्मेंऽशभवस्य वै । कालिकापुराणम्, ९ / २८

[२०]शौचसंतोषतपः स्वाध्यायेश्वरप्रणिधानानि नियमाः । योगदर्शनम्, साधनपादः ३२

[२१]शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः । तत्रैव, साधनपादः ४०

[२२]पार्वतीमभिसंमन्त्र्य शौचार्थं गतावांस्तदा । कालिकापुराणम्, ४६ / ७४ ;
दृढशासनतासत्यशौचं मतिविनिश्चयम् । तत्रैव, ८४ / ३१

[२३]शरीरशुद्धिमुख्ये तु सर्वकामार्थसाधने । कालिकापुराणम्, ७३ / ४

[२४]अशुचिर्न महामायां पूजयेत् तु कदाचन । तत्रैव, ५५ / ८८

[२५]एभिः प्रकारैरतिशुद्धदेहः पूजां सदैवार्हति नान्यथा हि ।
शरीरशुद्धिं मनसो निवेशं भूतप्रसारं कुरुते नृणांतत् ॥ तत्रैव, ५३ / ४०

[२६]संतोषादनुत्तमसुखलाभः । योगदर्शनम्, साधनपादः ४२

[२७]न राज्यमभिकांक्षावो न धनं नान्यदेव वा ।
त्वद्भक्त्या सेवनं कर्तुं तवेच्छावो वृषध्वज ॥ कालिकापुराणम्, ५१ / २०४

[२८]कार्येन्द्रियसिद्धिरशुद्धिक्षयात्तपसः । योगदर्शनम्, साधनपादः ४३

[२९]ततो नरो महायोगी तपस्तेपे महत्तमम् । कालिकापुराणम्, ३४ / २५

एकोनविंशेऽध्याये निर्दिष्टं यत् तपसा मर्यादायाः निर्माणं भवति[३१] । कालिकापुराणे तपसः स्वरूपं विस्तरेण प्रतिपादितमस्ति, यद्यथा कालिकापुराणानुसारं तपः सर्वदा निर्जनदेशे एव भवति, अत एव सन्ध्या कथयति यदहं तपः कर्तुं निर्जनशैलमागताऽस्मि[३२] । अपि च कालिकापुराणस्याभिमते तपसे तपोवनं श्रेयस्करं भवति, यतो हि भगवती काली तपसे तपोवनं गन्तुं मेनकां (मातरम्) प्रार्थयति[३३] । तपविधेः वर्णनमपि कालिकापुराणे उपलभ्यते । कथितञ्चोपपुराणेऽस्मिन् मौनेन स्नानं करणीयम्, ततः पूजनमपि मौनेनैव भवेत् । अथ च निर्दिशति कालिकापुराणकारो यदनया मौनार्चनया सार्धमुपवासोऽप्यनिवार्यः[३४] । कालिकापुराणानुसारमेतादृशः मौनतपः एव फलप्रदं भवति[३५] । उपपुराणेऽस्मिन् महादेवस्य तपसः प्रक्रियायाः उपस्थापनावसरे कथितं यत् नियतात्मभूत्वा शिवः उपांशुरूपेण तपति[३६] । कालिकापुराणानुसारं तपः कर्कशं भवति अत एव तपः सोढुं मुनेः गात्रमपेक्षितं भवति[३७] । ग्रीष्मर्तौ पञ्चाग्निसेवनस्योल्लेखः कालिकापुराणे विद्यते[३८] । अथ च वर्णितं यत् पार्वती पञ्चाग्निव्रताऽचरणेन सार्धं एकपादस्थितो भूत्वा तपः अकरोत्[३९] । एवमेव पञ्चचत्वारिंशेऽध्याये वर्णितं यत् भगवती पार्वती केवलमेकपादं समुत्क्षिप्य

---

[३०]श्रृणु पूर्वं त्वया वत्से वसिष्ठोऽयं वृत्तः पतिः ।
यथा तपः कृतं तत्र येन भावेन सन्ततम् ॥ तत्रैव, २३ / ६४

[३१]एतदर्थमहं कृत्वा तपः परमदारूणम् ।
मर्यादां स्थापयित्वैव पश्चात्त्यक्ष्यामि जीवितम् ॥ कालिकापुराणम्, १९ / ७७

[३२]तपः कर्तुमहं ब्रह्मन्निर्जनं शैलमागता । तत्रैव, २२ / २४

[३३]अनुजानीहि मां गन्तुं तपसेऽद्य तपोवनम् । तत्रैव, ४३ / १३

[३४]स्नानं मौनेन कर्तव्यं मौनेनैव तु पूजनम् ।
द्वयोः पर्णजलाहारं प्रथमं षष्ठकालयोः ।
तृतीये षष्ठकाले तु उपवासपरो भवेत् ॥ तत्रैव, २२ / ३६

[३५]एवं मौनी तपस्याख्या व्रतचर्या फलप्रदा । तत्रैव, २२ / ३७

[३६]श्रूयते व्यक्तसङ्गः स महादेवो यतात्मवान् ।
तपश्चोपांशु तपति देवानामप्यगोचरः॥ तत्रैव, ४१/७१

[३७]मृदुदेहासि पुत्रि त्वं मा तपो याहि कर्कशम् ।
तपः सोढुं मुनेर्गात्रं शक्तं ते न कलेवरम् ॥ तत्रैव, ४३ / १६

[३८]यज्ञियैर्दारुभिः शुष्कैश्चतुर्दिक्षु चतुष्कृतम् ।
वह्नि संस्थापनं ग्रीष्मे तीव्रंशुस्तत्र पञ्चमः ॥ कालिकापुराणम्, ४३ / ३२

[३९]पञ्चातपव्रतेनैव तोयानाञ्च प्रवेशनैः ।
एकपादस्थिता सा तु वसन्ते हिमवत्सुता ॥ तत्रैव, ४३ / ३७ - ३८

निरन्तरं निराहारा भूत्वा साधनामकरोत्[४०] । अत एव निराहारो भूत्वा कठोरतपश्चर्यया पार्वती क्षीणा जाता[४१] । एतदतिरिच्य कथितं यत् तपः चिरकालं यावदाचरणीयम्[४२] ।

**आसनम्** –स्थिरं सुखदायकञ्च भवत्यासनम्[४३]। सर्वदर्शनसङ्ग्रहे पद्मासनभद्रासनवीरासनस्वस्तिकासनदण्डकासनसोपाश्रयपर्यङ्कक्रौञ्चनिषदनोष्ट्रनिषदनसमसं स्थानभेदाद्दशविधानामासनामुल्लेख उपलभ्यते[४४] । दशसु प्रमुखासनेषु पद्मासनं मुख्यं मूलञ्च वर्तते । पद्मासनाख्यस्य महत्त्वपूर्णासनस्योल्लेखः कालिकापुराणेऽप्युपलभ्यते[४५] । एकषष्टितमेऽध्याये वर्णितं यत् भगवती गौरी पद्मासनस्थाऽस्ति[४६] ।अन्येषामासनानामुल्लेखोऽप्युपपुराणेऽस्मिन् विद्यते । वर्णितञ्च, स्वास्तिक-गोमुख-पर्यङ्कान्यासनानि देवपूजनाय अभीष्टानि वर्तन्ते[४७] । निर्दिष्टञ्चोपपुराणेऽस्मिन् यत् शवासनसुखासनाऽराध्यासनविमलासनादीनामभ्यासेन ध्यानं करणीयम्[४८] । अथ च वर्णयति कालिकापुराणकारो यत् निवारासनस्योपरि आहोस्वित् पर्यङ्कमुद्रायामासनं संस्थाप्य देव्याः ध्यानमनुष्ठेयम्[४९] । त्रिपुरभैरव्याः अर्चना-प्रसङ्गे वज्रासनस्योपयोगित्वं स्वरूपञ्च प्रतिपादितम्[५०] ।

---

[४०]एक पादं समुत्क्षिप्य वामेनाक्रम्य सा क्षितिम् ।
उत्तराभिमुखी भूत्वा निराहारा निरन्तरम् ॥ तत्रैव, ४५ / ७२

[४१]निराहारव्रता भूत्वा तपश्चरणखिन्निका । तत्रैव, ४३ / ३५

[४२]तस्मात् त्वं तपसा युक्ता चिरमाराधयेश्वरम् । तत्रैव, ४३ / ६

[४३]स्थिरसुखमासनम् । योगदर्शनम्, साधनपादः ४६

[४४]सर्वदर्शनसङ्ग्रहः (उमाशङ्करशर्मा ऋषिः, चौखम्बाविद्याभवनम्, वाराणसी, २००८), पातञ्जलयोगदर्शम्, पृष्ठम् ६१४, पङ्क्तिः १३

[४५]पद्मासनगतां देवीमक्षमालाधरां सिताम् । कालिकापुराणम्, २३ / १९ ;
पद्मासनगतं देवं चन्द्रमण्डलमध्यगम् । तत्रैव, ८० / १०६

[४६]व्याघ्रचर्मस्थिते पद्मे पद्मासनगता सदा । तत्रैव, ६१ / ४५ ; अरुणकमलसंस्था रक्तपद्मासनस्था नवतरुणशरीरा मुक्तकेशी सुहारा । तत्रैव, ६२ / १४२

[४७]स्वस्तिकं गोमुखं पद्मार्धस्वस्तिकमेव च ।
पर्यङ्कमासनं शस्तम् अभीष्टसुरपूजने ॥ तत्रैव, ५७ / ६७

[४८]आराध्यासनस्माच्च ततश्च विमलासनम् ।
मध्ये विचिन्तयेत् सर्वं जगद्वैसचराचरम् ॥ तत्रैव, ५७ / १२८

[४९]बद्धपर्यङ्कसङ्कल्पां निवारासनराजिताम् ॥ कालिकापुराणम्, ५३ / ३१

[५०]चर्मासनमधिष्ठाय पश्चात् कृत्वा पदद्वयम् ॥ तत्रैव, ७४ / १९२

**प्राणायामः -** योगदर्शने प्राणायामस्य विषये वर्णनमस्ति यत् स्थिरासने स्थित्वा श्वासप्रश्वासयोः गतेः विच्छेदः प्राणायामो भवति[५१] । कालिकापुराणे कुत्रचित् त्रिसहस्रं[५२] कुत्रचिच्च पञ्चसहस्रप्राणायामानामभ्यासार्थं निर्देशो विद्यते[५३] । एतस्य प्राणायामस्य तिस्रः वृत्तयः वर्तन्ते[५४]–

- बाह्यवृत्तिः ( रेचकवृत्तिः )
- आभ्यन्तरवृत्तिः ( पूरकवृत्तिः )
- स्तम्भवृत्तिः ( कुम्भकवृत्तिः )

त्रीन् प्राणायामान् कर्तुमुपपुराणमिदं निर्दिशति[५५] । अत एव त्रिविधप्राणायामस्य चर्चा कालिकापुराणस्य बहुषु स्थलेषूपलभ्यते[५६] । कालिकापुराणे 'त्रिपुरापूजाविधिः' इत्यस्मिन्नध्याये प्राणायामस्य त्रिविधाः भेदाः वर्णिताः - पूरकः स्तम्भकः रेचकश्चेति[५७] । अत्र कुम्भशब्दस्य स्थाने 'स्तम्भकेति' शब्दस्य प्रयोगः कृतः । यद्यपि अत्र शब्दभेदः तु अवश्यमेवास्ति तथाप्यर्थभेदः कदापि नास्ति । यतो हि मातृकाऽऽचमनविधिप्रसङ्गे पूरकरेचकाभ्यां सह "कुम्भकः" इति शब्दः एव प्रयुक्तः[५८] । पूरकवायोरुल्लेखः कालिकापुराणस्यान्यस्मिन् स्थलेऽप्युपलभ्यते[५९] । उच्छवासनिःश्वासयोः उपलब्धिरप्युपपुराणेऽस्मिन् भवति[६०] । कालिकापुराणस्य मतमस्ति यत्

---

[५१]तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः॥योगदर्शनम्,साधनपादः४९

[५२]प्राणायामसहस्राणि त्रीणि कृत्वा तु हर्षितः । कालिकापुराणम्, ७४ / ३७

[५३]प्राणायामसहस्राणि पञ्च वै पञ्चभिर्दिनैः । तत्रैव, ७४ / ४७

[५४]बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः । योगदर्शनम्, साधनपादः ५०

[५५]प्राणायामत्रयं कुर्याद् दहनं प्लवनं तथा । कालिकापुराणम्, ६४ / ५

[५६]प्राणायामश्च त्रिविधो भूतिशुद्धिप्रवेशनम् । तत्रैव, ६५ / १३

[५७]प्राणायामं ततः कुर्यात् पूरकैः स्तम्भकैस्तथा ।
रेचकेनापि त्रिपुरामूर्तिं देवीं विचिन्तयेत् ॥ कालिकापुराणम्, ६३/८४

[५८]अकारादिक्षकारान्तान्येवं श्वासैश्च पूरकैः ।
जलं करतले गृह्य पठित्वाक्षरसङ्ख्यकम् ॥
अभिमन्त्र्य तु तत् तोयं प्रथमं पूरकैः पिबेत् ।
कुम्भकेन द्वितीयं तु तृतीयन्त्वथ रेचकैः ॥ तत्रैव, ७३ / २३ - २४

[५९]विसृज्य मन्त्रेणानेन ततः पूरकवायुना । तत्रैव, ५७ / १७०

[६०]विश्वमाधृत्य मनसा यत्नाच्छवासं ससर्ज सः ।

मनोजीवात्मनोः शुद्धिः प्राणायामेनैव जायते[६१] । कथितञ्चोपपुराणेऽस्मिन् यत् प्राणायामस्य पूरकादिष्ववस्थासु दैविकं चिन्तनं करणीयम्[६२] ।

**ध्यानम् -** ध्येयविषये चित्तस्य स्थिरीकरणं ध्यानं भवति[६३] । कालिकापुराणस्य विविधेषु स्थलेषु ध्यानस्य वर्णनमुपलभ्यते यथा शिवस्य[६४] ध्यानमुपस्थापितमस्त्युपपुराणेऽस्मिन् । अथ वशिष्ठस्य[६५], विष्णोः[६६], कालिकायाः[६७] च ध्यानस्य वर्णनमपि कालिकापुराणे उपलभ्यते । एवञ्च वर्णितं यत् भगवत्याः चण्डिकायाः दर्शनं शिवः ध्यानमार्गेण अकरोत्[६८] । कालिकापुराणे उल्लिखितं यत् महादेवः ध्यानयोगेन परं तत्त्वं चिन्तयति[६९] ।

**समाधिः** –जितेन्द्रियत्वं समाधिनिमित्तमतीवमहत्त्वपूर्णं भवति, अत एव कालिकापुराणे समाधिस्थशिवस्य कृते कालिकापुराणकारेण जितेन्द्रियः इति विशेषणं योजितम्[७०] । कालिकापुराणे वर्णितं यत् नियताहारो भूत्वा मनुः समाधिनिमित्तं प्रयत्नमारभत[७१]। कालिकापुराणे समाधेः फलविषये प्रतिपादितमस्ति यत् शिवस्य समाधेः पुरतः कश्चिदपि स्थातुं

---

तस्य निःश्वासात् तु निःसृतं वै चरूद्वयम् ॥ तत्रैव, ८२ / ६४ - ६५

[६१]मनोजीवात्मनोः शुद्धिः प्राणायामेन जायते । तत्रैव, ५७ / १०८

[६२]यस्य देवस्य यद्रूपं तथा भूषणवाहनम् ।
तदेव पूजने तस्य चिन्तयेत् पूरकादिभिः ॥ तत्रैव, ५७ / ६०

[६३]तत्र प्रत्ययैकतानता ध्यानम् । योगदर्शनम्, विभूतिपादः २

[६४]ध्यानावस्थं महादेवं परिवार्य धृतव्रताः । कालिकापुराणम्, ३० / १५५;
ततस्तत्र महादेवः श्रुत्वा वाक्यं सुनिश्चितम् ।
मुनीनां पश्यतां योगयुक्तो ध्यानपरोऽभवत् ॥ तत्रैव, १२ / ४६

[६५]ध्यानस्थस्य वशिष्ठस्य देवैः सह जगाम ह । तत्रैव, २३ / १०३

[६६]वाराहं तेज आहर्तुं स्वयं ध्यानपरोऽभवत् । तत्रैव, ३० / ३८ ;
दृश्यमानस्तया क्षिप्रं तत्रैवान्तर्दधे प्रभुः । तत्रैव, ३७ / ४४

[६७]एवमुक्ता जगद्धात्री तत्रैवान्तरधीयत । तत्रैव, ४१ / ३६

[६८]बुद्धिरूपा स्वयं देवी चण्डिकेति च गीयते ।
इति स्वयं ददर्शासु ध्यानमार्गगतो हरः ॥ तत्रैव, १२ / ६५

[६९]हरश्च ध्यानयोगेन परं चिन्तयितुं स्थितः । तत्रैव, ४२ / ४०

[७०]यदा समाधिमाश्रित्य स्थितः शम्भुर्जितेन्द्रियः । तत्रैव, ७ / ८

[७१]स भूत्वा नियताहारः परमेण समाधिना । तत्रैव, ३२ / ३८

शक्तः नाऽसीत्[७२] । एवं प्रकारेण वक्तुं शक्नुमो यत् कालिकापुराणकारः वर्णनैः सम्यक्तया योगाङ्गानुपस्थापयति ।

**सन्दर्भ ग्रन्थ –**


- कालिकापुराणम्, आचार्य मृत्युञ्जय त्रिपाठी, नवशक्ति प्रकाशन चौकाघाट, वाराणसी, प्रथम संस्करण २००८
- पातञ्जलयोगप्रदीप, श्रीस्वामी ओमानन्दतीर्थः, गीताप्रेसगोरखपुरम्, विक्रमी संवत् २०७२
- श्रीगरुडपुराणमहापुराणम्, नागशरणसिंहः, नाग-पब्लिशर्ज-जवाहरनगरम्, दिल्ली, १९८५
- सर्वदर्शनसङ्ग्रहः, उमाशङ्करशर्मा ऋषिः, चौखम्बाविद्याभवनम्, वाराणसी, २००८



**विवेकशर्मा**

सहायकाचार्यः, केन्द्रीयविश्वविद्यालयः, धर्मशाला, भारतम्

vivek.mithu3343@gmail.com


[७२] यस्य त्यक्तसमाधेस्तु न क्षणं दृष्टिगोचरे ।
शक्नुमोऽपि वयं स्थातुं तं कस्मात् सा विमोहयेत् ॥ कालिकापुराणम्, ६ / २५